No. १२३८-घ

Title सनत्कुमार तन्त्रे त्रैलोक्य मङ्गलाख्यं कवचम्

Author

Extent ३ Age

Subject तन्त्रम्

त्रैलोक्यमङ्गलाख्यं कवचम्

॥ ३८   प॰ ३

सं० ११३८ ५

सनत्कुमारसंहिते

त्रैलोक्यमङ्गलाख्यं कवचम्

इन्द्राक्षी

N ...

११३८

ॐ श्रीगणेशाय नमः पुलस्त्य उवाच भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशि
१ तं त्रैलोक्यमंगलं नाम कृपया कथय प्रभो १ सनत्कुमार उवाच शृणु वि
प्रेंद्र वक्ष्यामि कवचं परमाद्भुतं नारायणेन कथितं कृपया ब्रह्मणे पुरा २
ब्रह्मणा कथितं मह्यं नवस्नेहावदामितत् अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघ
विग्रहं ३ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं यद्धृत्वा पठनात्पाति
महालक्ष्मीर्जगत्त्रयं ४ पठनाद्धारणाच्छंभुः संहर्ता सर्वतत्त्ववित् त्रैलोक्य
जननी दुर्गा महिषादिमहासुरान् ५ वरदृप्तान्जघानैव पठनाद्धारणाद्यु
तः एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ६ शिष्याय विष्णुभक्ताय साधक
य प्रकाशयेत् शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ७ त्रैलोक्यमंग
लस्यास्य कवचस्य प्रजापतिः ऋषिश्छंदश्चपंक्ती देवो नारायणः स्वयं ८ राम १

धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॐ प्रणवो मे शिरः पातु नमो ना-
रायणाय च १ भालं पायान्नेत्रयुग्ममष्टार्णो भुक्तिमुक्तिदः क्लीं पायाच्छ्रो-
त्रयुग्मं चैकाक्षरः सर्वमोहनः २ क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जि-
ह्विकां गोपीजनवल्लभाय पातु स्वाहाननं मम ३ अष्टादशाक्षरो मन्त्रः कं-
ठं पातु दशाक्षरः गोपीजनपदं वल्लभाय स्वाहा भुजद्वयं ४ क्लीं ग्लौं क्लीं श्या-
मलांगाय नमः स्कंधौ दशाक्षरः क्लीं कृष्णः क्लीं करौ पायात् क्लीं कृष्णाय गलं
मम ५ हृदयं भुवनेशाय क्लीं कृष्णाय क्लीं स्तनौ मम गोपालायाग्निजायांतं कु-
क्षियुग्मं सदावतु ६ क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः कृष्णगोविं-
दकौ पातां स्मराद्यौ ङेयुतौ मनुः ७ अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु
पृष्ठं क्लीं कृष्णकं कालं क्लीं कृष्णाय द्विठान्तकः ८ सक्थिनी सततं पातु श्रीं ह्रीं

— क्लींकृष्णहृदयं अव्यान्मान्त्रःपायात्त्रयोदशाक्षरोवतु १६ ह्रींश्रींक्लींपद
२ नेत्रोगोपीजनवल्लभायपदं नतः स्वाहेपार्श्वेवैक्लींह्रींश्रींषोडशार्णकः १७ जा
2 नुनीचसदापातुह्रींश्रींक्लींचदशाक्षरः त्रयोदशाक्षरःपातुजंघेचक्राद्युता
युधः १८ अष्टादशाक्षरोह्रींश्रींपूर्वकोविंशवर्णकः सर्वांगंमेसदापातुद्वा
रकानायकोवली १९ नमोभगवतेपश्चात्वासुदेवायततःपरं तारा द्यो
द्वादशार्णोयंप्राच्यांमांसर्वदावतु २० ह्रींश्रींक्लींदशवर्णात्तुक्लींह्रींश्रींषोड
शाक्षरः गदाद्यायुधोविष्णुर्मामग्नेर्दिशिरक्षतु २१ ह्रींश्रींदशाक्षरोमं
त्रोदक्षिणेमांसदावतु तारोनमोभगवतेरुक्मिणीवल्लभायच २२ स्वाहे
तिषोडशार्णोयंनैरृत्यांदिशिरक्षतु क्लींहृषीकेशपदांतायनमोमांवारुणो
वतु २३ अष्टादशार्णोकोमंत्रोवायव्येमांसदावतु श्रींमायाकामकृष्णाय १

गोविंदायद्विठोमनुः २४ द्वादशार्णात्मकोविस्तृतस्तेरेमांसदावतु वाग्भवं।
कामकृष्णायह्रींगोविंदायततःपरं २५ श्रीगोपीजनवल्लभायस्वाहाबलो
ततःपरं द्वाविंशत्यक्षरोमंत्रोऽईशान्येचसदावतु २६ कालीयस्यफणामध्ये
दिव्यंनृत्यंकरोतितं नमामिदेवकीपुत्रंनृत्यराजानमच्युतं २७ द्वात्रिंशदा।
क्षरोमंत्रोऽप्यधोमांसर्वदावतु कामदेवायविद्महेपुष्पबाणायधीमहि त
न्नोऽनंगःप्रचोदयात् गायत्रीकामदेवस्यसैषाउमांपातुचोर्ध्वतः इतितेक
ब्र थितंविप्रेन्द्रमंत्रौघविग्रहं २८ त्रैलोक्यमंगलंनामकवचंब्रह्मरूपकं ब्र
ह्मणाप्रभुःस्वाधीशानारायणमुखाच्छ्रुतं नवस्नेहान्मयाख्यातंप्रवक्तव्यंन
कस्यचित् गुरुंप्रणम्यविधिवत्कवचंप्रपठेत्ततः सकृद्द्विस्त्रिर्यथाज्ञानंसो
पिसर्वतपोमयः मंत्रेषुसकलेष्वेवदेशिकोनात्रसंशयः ३२ शतमष्टो।

नंचात्रपुरश्चर्याविधिस्ततः हवनादीन्दशांशेनकृत्वातत्साधयेद्ध्रुवं
यदिस्यात्सिद्धकवचोविष्णुरेवभवेत्स्वयंस्याद्धीमद्वयससततंलक्ष्मीवाणीवसे
न्मुखे १३ पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत् दशवर्षसहस्राणां
पूजायाःफलमाप्नुयात् १४ भूर्जेविलिख्यगुटिकांस्वर्णस्थांधारयेद्यदि
१५ कंठेवादक्षिणेबाहौसोपिविष्णुर्नसंशयः अश्वमेधसहस्राणिवाज
पेयशतानिच १६ महादानानियान्येवप्रादक्षिण्यंभुवस्तथा कलांना
र्हन्तितान्येवसकृदुच्चारणाद्यतः १७ कवचस्यप्रसादेनजीवन्मुक्तोभवेन्न
रः पुत्रपौत्रसमायुक्तस्त्रैलोक्येविजयीभवेत् १८ इदंकवचमज्ञात्वा
भजेद्यःपुरुषोत्तमं शतलक्षप्रजप्तोपिनमंत्रसिद्धिदायकः १९ इतिश्री
सनत्कुमारतंत्रेत्रैलोक्यमंगलंनामकवचंसंपूर्णंसमाप्तम् शुभमस्तु